# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०९)

## १९.११.२०१२

- वक्ष्यमाणा
- वच परिभाषणे
- वच् लृट्
- वच् ल्   (‘उपदेशेऽजनुनासिक इत्’ - १.३.२, ‘चुटू’ - १.३.७, ‘तस्य लोपः’ - १.३.९)
- वच्  (शानच्) आन   (‘लृटः सद्वा’ - ३.३.१४)
- वच् स्य आन   (‘स्यतासी लृलुटोः’ - ३.१.३३)
- वच् स्य म् आन   (‘आने मुक्’ - ७.२.८२)

- वक् स्य मान ('चोः कुः' - ८.२.३०)
- वक्ष्यमान ('आदेशप्रत्यययोः' - ८.३.५७)
- वक्ष्यमाण ('अट्कुप्वाङ्नुम्व्यवायेऽपि' - ८.४.२)

- स्थानी - लृट् लकारः - उगित्, टित् - ङीप् प्राप्तः
- आदेशः - शानच् - उगित् न, टित् न - ङीप् प्राप्तिः नास्ति

- आक्षेपः १
- स्थानिवद्भावेन शानचः अपि टित्त्वम् उगित्त्वं च भवति ।

- समाधानम् १
- अनल्विधावेव स्थानिवद्भावः, अनुबन्धकार्यम् अल्विधिः ।

- आक्षेपः २
- अल्विधिश्चेदपि अनुबन्धकार्यें स्थानिवद्भावः भवति ।

---

- कथं ज्ञायते?
- पाणिनिः 'न ल्यपि' इति ईत्वनिषेधार्थं सूत्रं करोति ।
- किति प्रत्यये परे एव 'घुमास्था...' इति सूत्रेण ईत्वप्राप्तिः भवति । ल्यप् प्रत्ययः कित् न । ईत्वे अप्राप्ते कुतो निषेधः?
- ल्यपः स्थानी क्त्वा प्रत्ययः, सः कित् । अनुबन्धकार्यें स्थानिवद्भावः अस्ति, अतः ल्यपः अपि कित्त्वं भवति इति मत्वा तन्निषेधार्थं पाणिनिः 'न ल्यपि' इति सूत्रं कृतवान् ।
- अनेन ज्ञायते, अनुबन्धकार्यें स्थानिवद्भावः भवति ।
- एवं चेत्, वक्ष्यमाणा इत्यत्र ङीप् प्राप्नोति ।

- समाधानम् २
- ‘लाश्रयम् अनुबन्धकार्यं नादेशानाम्’ इति नियमः अस्ति । तेन, लृटाश्रयं टित्त्वम् उगित्त्वं वा आदेशे शानचि न भवति ।

- अयं नियमः कथं ज्ञायते?
- लिङ् लकारस्य यासुट् आगमः विधीयते ‘यासुट् परस्मैपदेषूदात्तो ङिच्च’ इति सूत्रेण ।
- लिङ् लकारः ङित् । स्थानिवद्भावेनैव यासुटः ङित्त्वं सिध्यति ।
- पुनः यासुटः ङित्त्वविधानेन ज्ञायते, लाश्रयमनुबन्धकार्यं नादेशानामिति ।

- समाधानम् ३
- क्वचिद् अनुबन्धकार्येऽपि अनल्विधाविति निषेधः प्रवर्तते ।

- किं प्रमाणम्?
- 'हलः श्नः शानज्झौ' इति सूत्रेण श्नाप्रत्ययस्य स्थाने शानच् विधीयते ।
- श्नाप्रत्ययः शित् । स्थानिवद्भावेनैव तदादेशस्य शित्वं सिध्यति ।
- पुनः शानचः शित्वकरणेन ज्ञायते, क्वचिदनुबन्धकार्ये अपि 'अनल्विधौ' इति निषेधः भवतीति ।

- वक्ष्यमाणा इत्यत्र टित्त्वाद् उगित्त्वाच्च ङीप्प्राप्तः ।
- बहुकुरुचरेति । स्यादेतत् ।
- वक्ष्यमाणेत्यादिना ।

- यासुटो ङित्त्वेन ‘लाश्रयमनुबन्धकार्यं नादेशानाम्’ (प) इति ज्ञापनात् न भवति ।
- यासुट इत्यादि ज्ञापनादित्यन्तम् ।

- श्नः शानचः शित्त्वेन क्वचिद् अनुबन्धकार्येऽपि अनल्विधाविति निषेधज्ञापनाद् वा ।
- श्नः शानच इति ।

- ढ - सौपर्णेयी ।
- अण् - ऐन्द्री ।
- अञ् - औत्सी ।
- द्वयसच् - ऊरुद्वयसी ।
- दघ्नच् - ऊरुदघ्नी ।
- मात्रच् - ऊरुमात्री ।

- तयप् - पञ्चतयी ।
- ठक् - आक्षिकी ।
- ठञ् - लावणिकी ।
- कञ् - यादृशी ।
- क्वरप् - इत्वरी ।

# ताच्छीलिके णेऽपि (वा)

- तच्छीलार्थके णप्रत्यये सति तदन्तादपि ङीप् भवति इत्यर्थः ।
- चौरी ।
- चौरीति ।

# नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् (वा)

- नञ्स्नञ् ।
- नञ् - स्त्रैणी ।
- स्नञ् - पौंस्नी ।
- ईकक् - शाक्तीकी ।
- ख्युन् - आढ्यङ्करणी ।
- तरुण - तरुणी ।
- तलुन - तलुनी ।
- तरुणी, तलुनीति ।